Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# रघुवंशरहस्यरामायणयोः निरूपित–शिक्षाव्यवस्थायाः प्रासङ्गिकता



**श्रीमती प्रतीक्षा**
**शोधाध्येत्री, अध्यापनविभागः**
**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः**
**उज्जयिनी म.प्र. भारत।**

**Article Info**
Volume 3 Issue 6
Page Number: 16-19
Publication Issue :
November-December-2020

**Article History**
Accepted : 10 Nov 2020
Published : 30 Nov 2020

**सारांश** :– शोधपत्रेऽस्मिन् अद्यतनशिक्षाव्यवस्थायाः पद्धतेः परिष्कारार्थं विचाराः प्रस्तुताः सन्ति। संस्कृतवाङ्मये उपलब्धसन्दर्भाधारेण अत्र विद्यालयप्रबन्धनम्, शिक्षकप्रशिक्षणकौशलम्, अभिभावकसौहार्द्रं चेत्येतादृशेषु महत्त्वपूर्णविषयेषु रघुवंश–मालविकाग्निमित्र–रहस्यरामायण–रहस्यदीपिकास्थान् च प्रेरकसन्दर्भान् आधारीकृत्य वैचारिकी प्रस्तुतिः कृता अस्ति। एवं च संस्कृतवाङ्मयग्रन्थेष्वन्यत्रापि उपलब्धसन्दर्भाधारेण शिक्षणव्यवस्थाप्रबन्धने संवर्धनं कर्तुं शक्यते।

**मुख्य शब्द** :– रघुवंशम्, मालविकाग्निमित्रम्, रहस्यरामायणम् रहस्यदीपिका, शिक्षाव्यवस्था, विद्यालयप्रबन्धनम्, संस्कृतवाङ्मयम्।

---

मानवीयक्षमतानां पूर्णतया विकासाय तथा च न्यायसङ्गतसमाजस्य विकासाय शिक्षा मूलभूता आवश्यकता वर्तते। शिक्षापद्धतिः शिक्षार्थिकेन्द्रिता, गृहपाठशालाधर्मस्थानादिविविधकेन्द्राधारिता, शिक्षार्थिनां सर्वपक्षविकासिनी, मानवमूल्य– भाषाविकास– नैतिकता–तार्किकता–करुणा–संवेदनशीलतादीनां संवर्धिका भवतु इति साम्प्रतं महती आवश्यकता अनुभूयते।

शिक्षणपद्धतिप्रेरकाः सन्दर्भाः आस्माकं संस्कृतवाङ्मये विपुलतया प्राप्यन्ते। कविकुलगुरुः महाकविः कालिदासः रघुवंशे **'शैशवेऽभ्यस्तविद्यानामन्वयं वक्ष्ये'**[1] इत्युक्त्वा शिशुशिक्षां प्रति अस्मद्ध्यानमाकर्षयति। गृहमपि शिक्षाव्यवस्थायां महत्त्वभूतं स्थानं भवति। सर्वाधिकः मानवमस्तिष्कविकासः प्रथमे शिशुवयसि एव जायते। अतः कालिदासस्य सङ्केतः अयं यत् शिक्षापद्धतौ अभिभावकभूमिकायाः अपि योजना अत्यावश्यकी वर्तते।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

शैशवकालानन्तरं परिपक्वबुद्धिः बालः किं पठेदिति व्यवस्थायै शिक्षालययोजना कल्पितास्ति। तत्र च शिक्षकसन्निधौ अध्ययनं स्यादिति महाकविः कालिदासः सङ्केतयति–

**साङ्गं च वेदमध्याप्य किञ्चिदुत्क्रान्तशैशवौ।**

**स्वकृतिं गापयामास कविप्रथमपद्धतिम् ।।**[2]

शिक्षास्थलेषु शिक्षकाः अवदधति शिक्षार्थिनां मेधाशक्तिम्। अनेन हि शिक्षकस्य पाठयोजनानिर्माणे महत्साहाय्यं भवति। प्राक्तनसंस्काराणां प्रभावः शिक्षाव्यवस्थायामति– शयेनोपयुक्तो भवतीति महाकविः वदति–

**तां हंसमालाः शरदीव गङ्गा**

**महौषधीं नक्तमिवात्मभासः।**

**स्थिरोपदेशामुपदेशकाले**

**प्रपेदिरे प्राक्तनजन्मविद्याः ।।**[3]

शिक्षणपद्धतिनिर्माणे वैविध्यं दृश्यते। क्वचिदाचार्यः शास्त्राणां गभीरज्ञानयुक्तोऽपि सन् तदवगामयितुं नाधिकम् अवधानं करोति। क्वचिच्च अवगामयिता सुसम्यक् पाठनपद्धतिमनुसरति–

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था**

**सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**

**यस्योभयं साधु स शिक्षकाणां**

**धुरि प्रतिष्ठापयितव्य एव।।**[4]

अनेन एतदपि ज्ञायते यत्कालपरिस्थित्यनुगुणं शिक्षकाणां प्रशिक्षणविधानमपि यथाकालं करणीयमिति। व्यवस्थितया पूर्णपूर्वयोजनया च कृता पाठयोजना समस्तानपि छात्रान् युगपदुपकरोति। प्रयत्नेन पाठयिता छात्राणां पुरत आदर्शरूपेण सुप्रतिष्ठितो भवति। अध्यापनावसरे एवाध्यापकस्याध्ययनविलक्षणता प्रस्फुटीभवति। महाकविरत्र ज्ञापयति–

**सुशिक्षितोऽसर्वः उपदेशेन निष्णातो भवति।**[5]

पात्रभेदेन शिक्षा विविधप्रकारिका भवति। सत्पात्राय शिक्षादानेन सा शिक्षा वैलक्षण्यं जनयति। अतः एव शिक्षकाः शिक्षादानाय अधिकारिच्छात्रान् अन्विष्यावाह्य च विद्यां दधुरिति महाकवेः अभिमतम्–

**पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।**

**जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ।।**[6]

एवमेव रामकथामाश्रित्य लिखितरहस्यरामायणेऽपि बालकाण्डे बालकरामस्य शिक्षाविधौ यद्यत्प्रबन्धनं कल्प्यते। तदाधारीकृत्य साम्प्रतिकी शिक्षाव्यवस्था परिष्कर्तव्या इति अद्यत्वेऽनुभूयते। संस्कृतवाङ्मये एवंविधविषययुक्ताः महान्तो ग्रन्थाः सन्ति।

रहस्यरामायणं तारकसंहितास्थः अद्यावधि–अप्रकाशितः रामकथायुतो ग्रन्थः। तस्य रहस्यदीपिकाटीकाकर्ता आचार्यसोमनाथव्यासोऽपि यथावसरं स्वटीकायां रहस्यरामायणपद्यानाम् अभिनवां व्याख्यामकरोत्।

शिशुकालानन्तरं बालानां शैक्षिकव्यवस्थानुगुणं शैक्षिकं भ्रमणं तेषां लोकपरिज्ञानं कारयति–

**ततः शिशुत्वापगमेन तत्परं**

**वयः कुमाराः परिशिश्रियुर्नवम् ।**

**निजैर्विहारैः नगरौकसां मुदं**

**विलोचनानन्दसमुद्भवां दधुः।।**[7]

बौद्धिकं शारीरिकं च बलं संवर्धयितुं शारीरिकक्रीडाः परमावश्यक्यः भवन्ति। अथ च दम्भादीन् विकारान् समाप्य स्नेह–शक्ति–शील–शौर्य – देशभक्तीनां समादानाय, अथ सर्वेषु च समताभावजागरणार्थं विद्यालयेषु क्रीडाः कारणीयाः –

**श्रेष्ठ्यमात्यगुरुपण्डितडिम्भाः**

**सङ्गता सह विजहुरदम्भाः।।**

**क्रीडनोपकरणप्रकारांस्तान्**

**किङ्करात्मजगणा उपनिन्युः।।**[8]

शिक्षार्थिनां सर्वविधविकासार्थं विद्यालयव्यवस्था कथं करणीया इति प्रदर्शयति आचार्यः सोमनाथव्यासः शिक्षालयमिति पद्यस्य रहस्यदीपिकाटीकायाम् ।

**शिक्षालयं नरपतिः सरयूपकण्ठे**

**तुङ्गं विशालतरकल्पमनल्पशिल्पम् ।**

**सर्वर्तुसौख्यमनुकल्प्य च तत्र विद्या–**

**शिक्षाविचक्षणगुरून्ययमत्कलाज्ञान् ।।**[9]

'अनुकल्प्य' इत्यनेन राज्ञा एतादृशी उत्तमोत्तमा व्यवस्था कल्पिता आसीत्। अपि च, 'न्ययमत्' इत्यनेन नियमितवान्छात्राणां हितार्थं शिक्षकाणाम् आचारसंहितां निरमात्। विद्यासु सकलासु पारङ्गताः, तच्छिक्षणे च विचक्षणाः शिक्षकाः तत्र नियोजिताः आसन्। इति उक्तम्।

बाल्ये एव वयसि बह्व्यः भाषाः बोधनीयाः स्युः। विविधभाषाभूषितेऽस्मिन्विश्वे सर्वत्र गतिमन्तः स्युरस्मद्देशजाः जनाः इति बोधयति पद्यमिदम् –

**ते सर्वदेशलिपिभेदमवेत्य तत्तद्**
**भाषाविचक्षणतरा व्यवहारमार्गान् ।।**
**बुध्वाऽशुवैदिकमृतेऽबिलमेव तेभ्यो**
**विद्याकलासु कुशलाः सुधियो बभूवुः।।[10]**

अथ चैतादृशविद्याव्यवस्थासु यत्र विद्याविचक्षणगुरवः स्युः। यत्र च सर्वर्तुसोख्ययुतशिक्षालयार्थं प्रशासनव्यवस्थाः स्युः। तादृशव्यवस्थानिर्गताः छात्राः अपि परमकुशलिनः भवन्ति। यथा–

**विद्यासु चाऽपि सकलासु कलासु बालाः**
**एकोपदेशवशवित्तत्तदर्थतत्त्वाः।।**
**आपेदिरे परमकौशलमप्यनल्पं**
**सत्त्वानुसारसफला निखिला हि शिक्षा।।[11]**

अथ देशकालपरिस्थित्यनुगुणं यादृशी विद्या आवश्यकी तादृशी प्रशिक्षण–व्यवस्था पूर्णतया पूर्वचिन्तनेन च करणीया स्यात् प्रशासनेन, इति अवलोक्यते –

**गजगवयतुरगस्यन्दनोष्ट्रादिकाना–**
**मथ विविधपशूनां पक्षिणां चाऽपि विद्याः।**
**धनुरसिकरवालीपट्टिशप्राशपर्शू–**
**र्द्रुघणलगुडशङ्क्वच्छूरिकानामवैत्सुः ।।[12]**

एवम्प्रकारेण संस्कृतवाङ्मयग्रन्थेषु अन्यत्राऽपि ये शिक्षाव्यवस्था सन्दर्भाः सन्ति। ते साम्प्रतं विद्यार्थिनां सर्वविधविकासार्थं सर्वकाराणां सन्मार्गप्रेरणार्थं च अग्रेसारणीयाः स्युः इति अनुभूयते।

## सन्दर्भ


1. रघुवंशम् 1/8
2. रघुवंशम् 15/33
3. कुमारसम्भवम् 1/30
4. मालविकाग्निमित्रम् 1/16
5. मालविकाग्निमित्रम् 1/18 पद्यानन्तरम्
6. मालविकाग्निमित्रम् 1/6
7. रहस्यरामायणम् 1/7/2
8. रहस्यरामायणम् 1/7/7
9. रहस्यरामायणम् 1/7/42
10. रहस्यरामायणम् 1/7/43
11. रहस्यरामायणम् 1/7/44
12. रहस्यरामायणम् 1/7/45